"अथ नभस्य इव त्रिदशायुधम् कनकपिङ्गतडिद्गुणसंयुतम्" रघुः।

**त्रिदशारि** ६त०। असुरे शब्दरत्ना०।

**त्रिदशालय** पु० ६त०। १स्वर्गे अमरः। २सुमेरुपर्वते हलायु०

**त्रिदशावास** पु० ६त०। १स्वर्गे हला०। २सुमेरुपर्वते च।

**त्रिदशाहार** ६त०। अमृते सुधायां हलायु०।

**त्रिदशेश्वर** पु० ६त०। १इन्द्रे २दुर्गायां स्त्री ङीप्। "सुराज्ञास्त्रिदशा देवा नन्दिनी दुन्दुभिर्मता। तेषाञ्च नन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी" देवीपु० ४५ अ०।

**त्रिदिनस्पृश्** पु० त्रिदिनं स्पृशति स्पृश–क्विन्। १त्र्यहस्पर्शे क्षयाहे अवमदिनभेदे यथा "तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनम्। त्रिदिनस्पृक् दिनत्रयस्पर्शनादङ्गः" इति ज्यो० त०। अयनशब्दे ४३१ पृ० तदानयनादि दृश्यम्। अस्य क्विन्नन्तत्वात् झलि पदान्ते च कुत्वम्।

**त्रिदिव** पु० त्रयो ब्रह्मादयो दीव्यन्त्यत्र घञर्थे आधारे क, त्रिधा सत्त्वादिभेदेन दीव्यन्ति प्रकाशन्तेऽत्र दिव–क वा तृतीया द्यौः इत्तिविषये संख्याशब्दस्य पूरणार्थत्वात् पृषो०। लोकात् पुंस्त्वम्। १स्वर्गे, अमरः २आकाशे, हेमच०। ३नभसि ४सुखे न० शब्दार्थचि०। ५नदीभेदे स्त्री मेदि०। "न हीष्टमस्य त्रिदिवेऽपि भूपतेः"। "त्रिदिवस्थेष्वपि निस्पृहोऽभवत्"। "देवादिनाम त्रिदिवेऽपि यस्य" रघुः। "अमुं किल त्वं त्रिदिवादवातरः" माघः।

**त्रिदिवाधीश** पु० ६त०। १इन्द्रे हेम०। १देवमात्रे च। त्रिदिवेश्वरादयोऽप्यत्र।

**त्रिदिवेश** पु० ६त०। १देवे अमरः।

**त्रिदिवोद्भवा** स्त्री त्रिदिव उद्भवो यस्याः। १स्थूलैलायां राजनि०। २गङ्गायाञ्च। ३स्वर्गभवमात्रे त्रि०।

**त्रिदिवौकस्** पु० त्रिदिव ओको यस्य। १देवे अमरः। "यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः" मनुः पृषो० त्रिदिवौकसोऽपि तत्रार्थे।

**त्रिदृश्** पु० तिस्रः दृशोऽस्य त्रीणि भूतादीनि पश्यति वा दृश–कर्त्तरि क्विप् वा। १त्रिनयने शिवे हेमच०।

**त्रिदोष** न०त्रयाणां दोषाणां वातपित्तकफजानां समाहारः। १वातपित्तकफजदोषत्रये त्रयो दोषाहेतत्वेन यत्र। २त्रिदोषजे रोगभेदे त्रिदोषजशब्दे दृश्यम्।

**त्रिदोषज** त्रि० त्रिदोषात् जायते जन–ड। दोषत्रयजाते वातादिसन्निपातजे रोगभेदे "चिरज्वरे वातकफोल्वणे वा त्रिदोषजे वा दशमूलमिश्रः। किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिने वा त्रिवृताविमिश्रः" चक्रद०। अस्य पूर्वरूपं "सर्वलिङ्गसमवायः" भावप्र०। ज्वरशब्दे दृश्यम्।

**त्रिधन्वन्** पु० सुधन्वनः पुत्रभेदे "सुधन्वनः सुतस्त्वासीत् त्रिधन्वा रिपुमर्दनः। राजस्त्रिधन्मनस्त्वासीद्विद्वांस्त्रय्यारुणः सुतः" हरिवं० १२ अ०।

**त्रिधा** अव्य० त्रि+प्रकारे धाच्। त्रिप्रकारे। "एकैकमूर्त्तिर्बिभिदे त्रिधा सा" कुमा०। "ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः" गीता।

**त्रिधातु** पु० त्रीन् धर्मार्थकामान् दधाति पुष्णाति धा–तुन्। १गणेशे त्रिका०। समा० द्विगुः। २धातुत्रये न०।

**त्रिधामन्** पु० त्रीणि धामानि भूरादीनि स्थानानि, तेजांसि सत्त्वादीनि वा यस्य। १शिवे, २विष्णौ, ३अग्नौ च। शब्दार्थकल्पतरुः। समाहारद्विगुः। ४धामत्रये न०स्त्री स्त्रीत्वपक्षे वा ङीप्। "स एवोक्तश्चक्रमिदं त्रिनाभिसप्ताश्वयुक्तं वहते वै त्रिधाम" भा० आनु० १५८ अ०। "त्रिधामानं जपंस्तत्र स्मरन् विष्णुं सनातनम्" हरिवं० २७१ अ०। ६त०। ५त्रिसंख्यान्विते त्रि० तानि च कतिचित् संक्षिप्य "त्रिगुणीकृतसर्वाङ्गी चिद्रूपा शिवगेहिनी। प्रसूते" इत्युपक्रमे "त्रिपुष्करं स्वरान् देवीर्ब्रह्मादीनां त्रयं त्रयम्। वह्निकालत्रयं शक्तित्रयं इत्तित्रयं महत्। नाडीत्रयं त्रिवर्गं सा यद्यदन्यत् त्रिधाम तत्" शा० ति० उक्तानि। अन्यान्यपि त्रित्वसंख्यान्वितानि एकादिशब्दे दृश्यानि।

**त्रिधामूर्त्ति** पु० त्रिधा मूर्त्तिरस्य। ब्रह्मविष्णुमहेशरूपमूर्त्तित्रयान्विते परमेश्वरे।

**त्रिधार** त्रि०तिस्रो धारा अस्याः, त्रिषु स्थानेषु वा धाराः प्रवाहा अस्य अस्या वा। १धारात्रयान्विते २गङ्गायां स्त्री तस्याः स्वर्गमर्त्यपातालेषु धारासत्त्वात् तथात्वम् ३स्नुहीहक्षे च शब्दार्थचि०। तस्य अग्रत्रयवत्त्वात् तथात्वम्।

**त्रिधारक** पु० तिस्रो धारा अग्राण्यस्य कप् संज्ञायां कन् वा। गुण्डतृणे राजनि०।

**त्रिधारस्नुही** स्त्री त्रिषु भागेषु धारा यस्याः कर्म०। (तेकांटासिजु) स्नुहीभेदे राजनि०।

**त्रिधाविशेष** पु०त्रिधा त्रिप्रकारो विशेषः। सूक्ष्मादित्रयरूपे विशेषे "सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः" सां०का०। "सूक्ष्मशरीरमेकः माता पितृजो द्वितीयः महाभूतानि तृतीयो विशेषः। तेषां